योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः ०७४

चतुःसप्ततितमः सर्गः ७४

श्रीवसिष्ठ उवाच ।

तस्मिन्कल्पे तु संकल्पे तस्य यद्वपुरास्थितम् ।

श्रृणु तत्र व्यवस्थेयं विचित्राचारहारिणी ।। १

परमं यच्चिदाकाशं तद्विराडात्मनो वपुः ।

आद्यन्तमध्यरहितं लघु त्वस्य वपुर्जगत् ।। २

संकल्परहितो ब्रह्मा स्वाण्डं संकल्पनात्मकम् ।

वपुषः परितो भास्वत्पश्यत्याकाशमेव तत् ।। ३

ब्रह्मात्मैष स्वसंकल्पं स्वमण्डमकरोद्द्विधा ।

तैजसं तैजसाकारः पुष्टः पुष्टं विहंगवत् ।। ४

अण्डस्यैकं नभो दूरं गतं संबुद्धवानसौ ।

भुवोधःसंस्थितं भागं व्यतिरिक्तं च नात्मना ।। ५

ब्रह्माण्डभाग ऊर्ध्वस्थो विराजः शिर उच्यते ।

अधोभागोऽस्य पादाख्यो नितम्बो मध्यमात्रखम् ।। ६

दूरं विमुक्तयोः संधिः खण्डयोरिति विस्तृता ।

अनन्ता व्योमलेखा सा श्यामा शून्येति दृश्यते ।। ७

द्यौस्तालु विपुलं तस्य तारारुधिरबिन्दवः ।

संविद्वातलवा देहे सुरासुरनरादयः ।। ८

देहान्तः कृमयस्तस्य भूतप्रेतपिशाचकाः ।

लोकान्तराणि रन्ध्राणि सुषिराण्यस्य देहके ।। ९

ब्रह्माण्डखण्डमस्याधो विस्तृतं पादयोस्तलम् ।

जानुमण्डलरन्ध्राणि पातालकुहराण्यधः ।। १०

जलैश्चलचलायन्ती सुषिरानेकरन्ध्रिका ।

भूरन्तर्मण्डली लोला समुद्रद्वीपवेष्टना ।। ११

जलैर्गुडगुडायन्त्यो नद्यो नाड्यः सरिद्रसः ।

जम्बूद्वीपं हृदम्भोजमस्य हेमाद्रिकर्णिकम् ।। १२

कुक्षयः ककुभः शून्या यकृत्प्लीहादयोऽचलाः ।

मृद्व्यः स्निग्धाः पटाकारा मेदसो जालिका घनाः ।। १३

चन्द्रार्कौ लोचने तस्य ब्रह्मलोको मुखं स्मृतम् ।

तेजः सोमोऽस्य कथितः श्लेष्मा प्रालेयपर्वतः ।। १४

अग्निलोकस्तथौर्वाग्निः पित्तमस्यातिदुःसहम् ।

वातस्कन्धमहावाताः प्राणापाना हृदि स्थिताः ।। १५

कल्पद्रुमवनान्यस्य सर्पवृन्दानि च क्वचित् ।

लोमजालान्यनन्तानि वनान्युपवनानि च ।। १६

ऊर्ध्वं ब्रह्माण्डखण्डं तु समस्तमुरुमस्तकम् ।

ब्रह्माण्डप्रान्तरन्ध्रार्चिरस्य दीप्ता शिखोत्थिता ।। १७

स्वयमेष मनस्तेन मनो नास्योपयुज्यते ।

आत्मैव भोक्तृतामेति किल कस्य कथं कुतः ।। १८

स्वयमेवेन्द्रियाण्येष तेनान्यत्रास्तिता कृता ।

यतस्तत्कल्पनामात्रमेवेन्द्रियगणः किल ।। १९

अवयवावयविनोरिवेहेन्द्रियचित्तयोः ।

न मनागपि भेदोऽस्ति चैक्यमेकशरीरयोः ।। २०

तस्य तान्येव कार्याणि जगतां यानि कानिचित् ।

संकल्पा एव पुंवृत्त्या चलन्त्यारूपितद्विताः ।। २१

जागते तस्य विज्ञेये नान्येऽस्य मृतिजन्मनी ।

स एवेदं जगत्यस्मत्संकल्पात्मास्य नेतरत् ।। २२

तत्सत्तया जगत्सत्ता तन्मृत्यैव जगन्मृतम् ।

यादृशी स्पन्दयमरुतोः सत्तैका तादृशी तयोः ।। २३

जगद्विराजोः सत्तैका पवनस्पन्दयोरिव ।

जगद्यत्स विराडेव यो विराट् तज्जगत्स्मृतम् ।। २४

जगद्ब्रह्मा विराट् चेति शब्दाः पर्यायवाचकाः ।

संकल्पमात्रमेवैते शुद्धचिद्व्योमरूपिणः ।।

श्रीराम उवाच ।

संकल्पात्स विराडेव खमेवाकृतिमागतम् ।

अस्तु नाम स्वदेहान्तः कथं ब्रह्मैव तिष्ठति ।। २६

श्रीवसिष्ठ उवाच ।

यथा ध्यानेन देहान्तस्तिष्ठसि त्वं यथा स्थितम् ।

तथास्ते निजदेहेऽन्तः संकल्पात्मा पितामहः ।। २७

नृणां तथा च मुख्यानां जीवो ब्रह्मपुरोदरे ।

उत्पत्तिपुत्रिकादेहः प्रतिबिम्बोपमोऽस्ति सः ।। २८

यत्र त्वमपि देहान्तः कर्तुं शक्तोऽस्यलं स्थितम् ।

संकल्पात्मा विभुस्तत्र ब्रह्मा किं न करिष्यति ।। २९

बीजान्तः स्थावरं ह्यास्ते पदार्थे यत्र जंगमः ।

किं नास्ते तत्र देहेऽन्तर्निजचित्कल्पनात्मिका ।। ३०

साकारो गगनात्मास्तु निराकारं स्वप्नस्तु वा ।

आस्ते बहिरथान्तश्च भिन्ने बाह्यान्तरे बहिः ।। ३१

आत्मारामः काष्ठमौनी न जडोऽपि दृषज्जडः ।

अहंत्वमित्यादिमयो विराडात्मनि तिष्टति ।। ३२

आवेष्टितोज्झितलतातृणदारुपुंव-

दुच्छब्दमम्बुरयवच्च विरोपिताङ्गः ।

नानाविधेऽपि विहरन्नपि कार्यजाले

तज्ज्ञः शिलाजठरशान्तमनस्क एव ।। ३३

इत्यार्षे श्रीवासिष्ठमहारामायणे वा० दे० मोक्षोपायेषु निर्वाणप्रकरणे उ० पाषा० विराडात्मवर्णनं नाम

चतुःसप्ततितमः सर्गः ।।७४।।